শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱিভীষণ কৃতং

# ॥ শ্রী আপদুদ্ধারণ হনূমৎস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী আপদুদ্ধারণ হনূমৎস্তোত্রম্ ॥

অস্য শ্রীআপদুদ্ধারণহনূমৎস্তোত্র মহামন্ত্রস্য।
ৱিভীষণ ঋষিঃ। আপদুদ্ধারণো হনূমান্ দেৱতা।
আপদুদ্ধারণহনূমৎপ্রসাদসিদ্ধ্যর্থে জপে ৱিনিযোগঃ ॥

ৱামে করে ৱৈরিভীতং ৱহন্তং
    শৈলং পরে শৃঙ্খলহারিটঙ্কম্।
দধানমচ্ছচ্ছৱিযজ্ঞসূত্রং
    ভজে জ্ৱলৎকুণ্ডলমাঞ্জনেযম্ ॥ **1** ॥

সুপীতকৌপীনমুদঞ্চিতাঙ্গুলিং
    সমুজ্ৱলন্মৌঞ্জ্যজিনোপৱীতিনম্।
সকুণ্ডলং লম্বশিখাসমাৱৃতং
    তমাঞ্জনেযং শরণং প্রপদ্যে ॥ **2** ॥

আপন্নাখিললোকার্তিহারিণে শ্রীহনূমতে।
অকস্মাদাগতোৎপাতনাশনায নমোঽস্তু তে ॥ **3** ॥

সীতাৱিযুক্তশ্রীরামশোকদুঃখভযাপহ।
তাপত্রিতযসংহারিন্ আঞ্জনেয নমোঽস্তু তে ॥ **4** ॥

আধিৱ্যাধিমহামারি গ্রহপীডাপহারিণে।
প্রাণাপহর্ত্রে দৈত্যানাং রামপ্রাণাত্মনে নমঃ ॥ **5** ॥

সংসারসাগরাৱর্ত কর্তৱ্যভ্রান্তচেতসাম্।
শরণাগতমর্ত্যানাং শরণ্যায নমোঽস্তুতে ॥ **6** ॥

রাজদ্বারি বিলদ্বারি প্রৱেশে ভূতসঙ্কুলে।
গজসিংহমহাৱ্যাঘ্রচোরভীষণকাননে॥ **7** ॥

শরণায শরণ্যায ৱাতাত্মজ নমোঽস্তু তে।
নমঃ প্লৱঙ্গসৈন্যানাং প্রাণভূতাত্মনে নমঃ॥ **8** ॥

রামেষ্টং করুণাপূর্ণং হনূমন্তং ভযাপযম্।
শত্রুনাশকরং ভীমং সর্ৱাভীষ্টফলপ্রদম্॥ **9** ॥

প্রদোষে ৱা প্রভাতে ৱা যে স্মরন্ত্যঞ্জনাসুতম্।
অর্থসিদ্ধিং যশঃ কীর্তিং প্রাপ্নুৱন্তি ন সংশযঃ॥ **10** ॥

কারাগৃহে প্রযাণে চ সঙ্গ্রামে দেশৱিপ্লৱে।
যে স্মরন্তি হনূমন্তং তেষাং নাস্তি ৱিপত্তদা॥ **11** ॥

ৱজ্রদেহায কালাগ্নিরুদ্রাযামিততেজসে।
ব্রহ্মাস্ত্রস্তম্ভনাযাস্মৈ নমঃ শ্রীরুদ্রমূর্তযে॥ **12** ॥

জপ্ত্বা স্তোত্রমিদং মন্ত্রং প্রতিৱারং পঠেন্নরঃ।
রাজস্থানে সভাস্থানে প্রাপ্তৱাতে জপেদ্ধ্রুৱম্॥ **13** ॥

ৱিভীষণকৃতং স্তোত্রং যঃ পঠেৎ প্রযতো নরঃ।
সর্ৱাপদ্ভ্যো ৱিমুচ্যেত নাত্র কার্যা ৱিচারণা॥ **14** ॥

মর্কটেশ মহোৎসাহ সর্ৱশোকৱিনাশন।
শত্রূন্ সংহর মাং রক্ষ শ্রিযং দাসাংশ্চ দেহি মে॥ **15** ॥

॥ ইতি শ্রী আপদুদ্ধারণ হনূমৎস্তোত্রং সমাপ্তম্ ॥